International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(6): 97-101
© 2022 IJSR
www.anantaajournal.com
Received: 21-08-2022
Accepted: 26-09-2022

**वर्षा**
शोध-छात्रा, दर्शनविभाग:
श्रीलालबहादुरशास्त्री राष्ट्रिय संस्कृत विश्वविद्यालय:, दिल्ली, भारत

Corresponding Author:
**वर्षा**
शोध-छात्रा, दर्शनविभाग:
श्रीलालबहादुरशास्त्री राष्ट्रिय संस्कृत विश्वविद्यालय:, दिल्ली, भारत

# वेदान्तदर्शनपरम्परायां विशिष्टाद्वैतः

## वर्षा

**प्रस्तावना**

सर्वप्रथमं तु दर्शनपदेन किमभिधीयते इति जिज्ञासेमहि? तत्र दर्शनशब्दस्य द्विरुत्पत्तिः क्रियते।

१. **दृश्यतेऽनेनेति दर्शनम्**[1] अत्र दृश्यते पदस्यार्थ ज्ञायते इति अतः येन तत्त्वानां सम्यगवबोधो भवति तद्दर्शनपदेनाभिधीयते। अथ च अपरं

२. **दृश्यते इति दर्शनम्** अर्थात् तत्त्वाबोधः, साक्षात्कारः, आत्मदर्शनम् इत्यपि दर्शनपदेनैवोच्यते। भारतीयदर्शनानां सन्दर्भे तु प्रथमा व्युत्पत्तिरेव समीचीना, एतदनुसारं भारतीयदर्शनं स्ववेदान्तादिशाखानां माध्यमेन तत्त्वावबोधस्य साधनं वर्त्तते। भारतीयदर्शनम् आस्तिक-नास्तिकभेदेन[2] च द्विधा विभज्यते, तस्यानुमतमधस्तात् प्रस्तूयते।

| **आस्तिकाः** | **नास्तिकाः** |
|---|---|
| १.वेदस्यानुयायिनो भवन्ति | १. वेदविरोधिनो भवन्ति |
| २. ईश्वरे विश्वसन्ति | २. ईश्वरे न विश्वसन्ति |
| ३. परलोकस्य सत्तां स्वीकुर्वन्ति | ३. परलोकस्य सत्तां न स्वीकुर्वन्ति |

आस्तिकदर्शनेषु अन्तर्भवन्ति-न्याय-वैशेषिक-सांख्य-योग-मीमांसा-वेदान्तदर्शनानि।

नास्तिकदर्शनेषु अन्तर्भवन्ति-चार्वाक्-जैन-बौद्धदर्शनानि।

भारतीयदर्शनपरम्परायां आस्तिकदर्शनेषु अन्तर्गतस्य वेदान्तदर्शनस्य महती समृद्धिर्वर्त्तते। लोके हि तिलेषुतैलमिव वेदान्तः सुप्रतिष्ठितः इति मान्यता वर्त्तते। यतोहीदमुच्यते वेदान्तो नाम उपनिषद्प्रमाणम्।[3] उपनिषत्सु च सर्वे श्रद्धारताः नताः सन्दृश्यन्ते। यतश्चेदं दर्शनम् एकत्वज्ञानमेवाधिकृत्य विद्यते। अथ च ब्रह्मसूत्रशंकरभाष्येऽपि स्पष्टतया इदं उल्लिख्यते यत्-आत्मैकत्वविद्याप्रतिपत्तये

सर्वे वेदान्ताः प्रारभ्यन्ते।[4] आचार्य बादरायणादपि प्राक् (२०० ई.पू.) अथ च अनन्तरं वेदान्तदर्शनस्य अनेके आचार्याः बभूवुः यैः वेदान्तस्य महती गरिमा प्रवर्धिता। तेषां नामोल्लेखः अधस्तात् क्रियते-

1. बादरिः[5]
2. जैमिनिः[6]
3. काशकृत्स्नः[7]
4. औडुलोमिः[8]
5. आश्मरथ्यः[9]
6. भर्तृहरिः[10]
7. गौडपादाचार्यः[11]
8. शंकराचार्यः[12]
9. भास्करः
10. रामानुजः
11. माध्वाचार्यः
12. श्रीकण्ठः
13. श्रीपति

इत्यादिभिरनेकैः आचार्यैः वेदान्तस्य मुहुर्मुहुः परिमार्जनं कृतम्। येनास्यां वेदान्तपरम्परायामनेके सम्प्रदायाः अभवन्। तेषां किञ्चिदन्तरेण भिन्नं मतं भिन्नं सिद्धान्तं चाभवत्। नेयं अनवरतं परिवर्तमाना वेदान्तपरम्परा वेदान्तं विशिनष्टि अपितु तस्य साहित्ये विचारवैविध्ये च समृद्धिं करोति। अस्याः परम्परायाः एव आचार्य-सम्प्रदाय-मतपुरस्सरं च उल्लेखः क्रियते अधस्तात् -

**आचार्यः मतम्/वादः भाष्यम् समयः**

1. शङ्कराचार्यः अद्वैतम् शारीरकभाष्यम् ७८८-८२ई.
2. भास्कराचार्यः भेदाभेदवादः भास्करभाष्यम् १००० ई.
3. रामानुजाचार्यः विशिष्टाद्वैतम् श्रीभाष्यम् १०१७-१११७ ई.
4. माध्वाचार्यःद्वैतम् पूर्णप्रज्ञभाष्यम् १२३८-१३१७ ई.
5. निम्बार्कः द्वैताद्वैतम् वेदान्तपारिजातः ११००ई.
6. श्रीकण्ठः शैवविशिष्टाद्वैतवादः शैवभाष्यम् १४७० ई.
7. श्रीपतिः वीरशैवविशिष्टाद्वैतवादः श्रीकरभाष्यम् १४०० ई.
8. वल्लभाचार्यः शुद्धाद्वैतम् अणुभाष्यम् १४७९-१५३२ ई.
9. विज्ञानभिक्षुः अविभागाद्वैतम् विज्ञानामृतभाष्यम् १६०० ई.
10. श्रीपञ्चाननतर्करत्नभट्टाचार्यः स्वरूपाद्वैतम् शक्तिभाष्यम् १८६७-१९४० ई.
11. बलदेव विद्याभूषणः अचिन्त्यभेदाभेदः गोविन्दभाष्यम् १७२५ ई.

इत्यादयोऽनेके सम्प्रदायाः वेदान्तदर्शनेनाभिसम्बद्धाः विद्यन्ते। येषु वेदान्तस्य अभिनवाः सिद्धान्ताः विचारवैविध्यं च ज्ञातुं लभते। अधस्तादधुना अद्वैतादिमतानां संक्षेपेण चर्चां कुर्मः येनैतेषां मतानां (सिद्धान्तस्य) परिशीलनं समीक्षणं च भवेत्।

**अद्वैतवादः** अद्वैतवेदान्तदर्शनस्य मुख्यः प्रवर्तकः आदिशङ्कराचार्यः विद्यते। इदं दर्शनं जीवब्रह्मणोः पार्थक्यं न मत्वा तयोः जीवब्रह्मणोरैक्यं प्रतिपादयति। दर्शनेऽस्मिन् संसारः माया (भ्रम) रूपेण वर्णितः। सर्वं किमपि सुखदुःखात्मिकाः भावनाः अपि ब्रह्मातिरिच्य न किञ्चित्, सर्वं ब्रह्मणः विवर्तमेव। आदर्शवाक्यम्- अहं ब्रह्मास्मि।

शङ्कराचार्यस्त्वाह-

ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः।[14]

**द्वैतवादः**- द्वैतवादस्य मुख्यः प्रवर्तकः मध्वाचार्यः अस्ति। अस्मिन् दर्शने जीवब्रह्मणोः सत्ता पृथक्-पृथक् स्वीक्रियते। द्वयोर्भावः द्वैतम्। एतद्दर्शनानुसारं जगन्मिथ्या नास्ति, तस्य व्यावहारिकी सत्ता वर्तते जगन्निर्मातुश्च ईश्वरस्यापि पृथक् सत्ता वर्त्तते।

**द्वैताद्वैतवादः** अस्य दर्शनस्य प्रमुखः प्रवर्तकः निम्बार्काचार्योऽस्ति। अयं द्वैतम् अद्वैतमिति उभयमपि दर्शनं समीचीनम् आकलयति। एतदनुसारं

आत्मा परमात्मन एव अंशोऽस्ति। एतं वयं भिन्नं वक्तुं शक्नुमः किन्तु परमार्थतस्तु तदेकमेव। यथा मृत्तिका एव घटरूपे परिणमति किन्तु घटः मृत्तिकया भिन्नः नास्ति परन्तु व्यवहारकाले तु वयं भिन्नमेव वदामः परमार्थतस्तु तदेकमेव।

एषोऽणुरात्मा चेतसा वेदितव्यः।[15]

**शुद्धाद्वैतम्** - अस्य वादस्य प्रतिपादकः वल्लभाचार्यः विद्यते। शुद्धाद्वैतदर्शनं शङ्कराचार्यस्य अद्वैतवादात् भिन्नो वर्त्तते। अद्वैतमते हि मायया युक्तं ब्रह्म जगत्कारम् इत्युच्यते अथ च तत्र सम्पूर्णमपि जगत् मिथ्या वर्त्तते। तत्रैव शुद्धाद्वैते मायासम्बन्धरहितं नितान्तं शुद्धं ब्रह्म एव जगतः कारणं स्वीकृतम्।[16] अद्वैतमते यत्र द्वैतं सर्वथा मायिकं मत्वा जगन्मिथ्यात्वं प्रतिपाद्यते जीवं च ब्रह्मणः प्रतिबिम्बितमिति ख्यातं तत्रैव शुद्धाद्वैते-

"ब्रह्मसत्यं जगत्सत्यं अंशो जीवो हि नापरः" इदं विमुक्तकण्ठेनोच्यते।

**अचिन्त्यभेदाभेद**: अस्य प्रवर्तकः महाप्रभुचैतन्यः अस्ति। एषः मनुते यत् ब्रह्म भेदातीतं वर्त्तते। स्वशक्त्या तु तत् जीव-जगद्रूपेण च आविर्भवति। जीवजगती ब्रह्मणः भिन्नमभिन्नं च स्तः। स्वात्मनि तत् निमित्तकारणमस्ति परन्तु शक्त्या सम्पर्केण तत् उपादानकारणमपि वर्त्तते। प्रलयान्ते परमात्मा जगत् सिसृक्षति। तदा स प्रकृतिगर्भे प्रविश्य तं कार्योन्मुखीकरोति।[17] तस्य तटस्थशक्त्या जीवानां मायाशक्त्या च जगतः निर्माणं भवति। संसारः मिथ्या नास्ति, मोक्षे जीवस्याज्ञानं नश्यति किन्तु संसारः तथैव तिष्ठति।

**शैवविशिष्टाद्वैतवाद**:- अस्य वादस्य प्रवर्तकः श्रीकण्ठाचार्यः वर्त्तते। जगतः जन्म, स्थितिः, प्रलयस्यावरणं (जीवस्य नित्यसिद्धज्ञानं, क्रियाशक्त्योश्च आवरणरूपबन्धनं) अनुग्रहः (मुक्तिप्रदानं) इति पञ्चकृत्यानि यस्मात् उत्पन्नानि, यत् चिदचित्प्रपञ्चाकारेण परिणामी परमशक्तिविशिष्टं सर्वकलङ्करहितं निरतिशयज्ञानानन्दमहिम्ना युक्तं शिवतत्वमेव इह ब्रह्मेति उच्यते। अस्मिन् शैवविशिष्टाद्वैतदर्शने यद्यपि जीवः परब्रह्मणः शिवतत्त्वात् भिन्नमस्ति तथापि "अहं ब्रह्मास्मि" अथ च "शिवोऽहम्"[18] इत्थं शिवतत्वात् भेदभावनाद्वारा- पशुभावे च निवृत्तित्वात्- "अहं नित्यः निरतिशयः आनन्दस्वरूपः साक्षिस्वरूप निष्कलङ्कः शिवः अस्मि" इति सगुणब्रह्मरूपशिवत्वप्राप्तिरेव मुक्तिः। अस्मिन्दर्शने ज्ञानकर्मणां समुच्चयः एव मोक्षसाधनमस्ति।

**वीरशैवविशिष्टाद्वैतवाद**: अस्य दर्शनस्य प्रतिष्ठाता श्रीपतिः विद्यते। श्रीपतिः प्राधान्येन त्रयाणां पदार्थानामुल्लेखं करोति- १.पतिः २.पशुः ३.पाशः। अस्मिन् सिद्धान्ते परब्रह्म एव पतिशब्दवाच्यः। चिदचित्विशिष्टपतिरेवास्य दर्शनस्य सारम्। पशुशब्दवाच्यः जीवः शिवस्य एव अंशः इति ख्यातम्। शक्तिविशिष्टं जगदेव पाशशब्देन उच्यते। इह जगत् परमार्थतः सत्यमस्ति। शिवांशजीवः मुक्तिकाले शिवसायुज्यं प्राप्नोति इति अस्य दर्शनस्य परम तात्पर्यम्। एतदनुसारं परब्रह्म लिङ्गरूपेण अङ्गरूपेण च भासते। अङ्गस्यार्थः जीवात्मा, लिङ्गत्वेन शिवः कथ्यते अतः लिङ्ग-अङ्गरूपशिवजीवयोः सायुज्यमेव अस्मिन् दर्शने मोक्षः इत्युच्यते। तच्च सायुज्यं भवति भक्तेः॥

**विशिष्टाद्वैतम्**

मुख्यतया प्राचीनवैष्णवदार्शनिकसम्प्रदायः चतुर्षु भागेषु विभक्तो वर्त्तते। तदन्तर्गतमेव च रामानुजाचार्यस्य विशिष्टाद्वैतमपि आयाति। यथोक्तं पद्मपुराणे-

रामानुजः श्रीः स्वीचक्रे माध्वाचार्यः चतुर्मुखः।
श्रीविष्णु स्वामिनं रुद्रो निम्बादित्यं चतुःसनः॥[19]

एतत् वयं इत्थमवगन्तुं शक्नुमः-

**सम्प्रदायः** **आचार्यः** **मतम्**

1. श्रीसम्प्रदायः रामानुजाचार्यः विशिष्टाद्वैतम् वेदान्तदर्शनम्
2. ब्रह्म सम्प्रदायः माध्वाचार्यः द्वैतवादान्तदर्शनम्
3. रुद्रसम्प्रदायःवल्लभाचार्यः/विष्णुस्वामी शुद्धाद्वैतम्
4. सनकसम्प्रदाय निम्बार्काचार्य द्वैताद्वैतम्

वैष्णववेदान्तदर्शने श्रीसम्प्रदायद्वारा प्रवर्त्तितं विशिष्टाद्वैतं वेदान्तदर्शनं प्रसिद्धम्। श्रीसम्प्रदाय एव लक्ष्मीसम्प्रदाय इति नाम्नाऽपि अभिधीयते। अस्य दर्शनस्य आचार्य परम्परायां प्राचीन-अर्वाचीन भागोऽपि प्राप्यते। यथा-

प्राचीन आचार्याः- विशवसेन-शठकोप बोधायनप्रभृतिः नाथमुनिः पर्यन्तम्।

अर्वाचीन आचार्याः- नाथमुनिमारभ्य रंगरामानुजवेदान्तदेशिकाचार्यपर्यन्तम्।

विशिष्टाद्वैतदर्शनस्य निरूपणं बोधायनाचार्यस्य ब्रह्मसूत्रवृत्तिमनुसृत्य विधत्तमिति श्रीभाष्यादौ

**रामानुजाचार्यः** "भगवद् बोधायनकृतां ब्रह्मसूत्रवृत्तिं पूर्वाचार्याः संचिक्षिषुः। अतः तन्मतानुसारेण सूत्रारक्षाणि व्याख्यास्यन्ते।[20]

**प्रमाणविमर्शः**

प्रमायाः करणमेव प्रमाणम्। सर्वेषां ज्ञेयपदार्थानां ज्ञानं प्रमाणाधीनं भवति। प्रमाणानि एव ज्ञानस्य द्वाराणि इति वक्तुं शक्यते। विशिष्टाद्वैतदर्शने त्रीणि प्रमाणानि स्वीकृतानि सन्ति- प्रत्यक्षम्, अनुमानम्, शब्दः।

अस्मिन् दर्शने सर्वं ज्ञानं यथार्थमिति निर्णयः। ज्ञानस्य अयथार्थत्वं विशिष्टाद्वैतदर्शने नानुमन्यते।

**यथार्थं सर्वविज्ञानमिति वेदविदां मतम्।**[21]

**यथार्थख्यातिवादः**- वेदोक्तपञ्चीकरणप्रक्रिया द्वारा एतत् वेविद्यते यत् सर्वेषु वस्तुषु सर्वाणि वस्तूनि अनुस्यूतानि भवन्ति। अतः यदोच्यते 'इदं रजतम्' तत्रापि शुक्तौ रजतांशः भवत्येव। उत्तरकाले यदुच्यते 'नेदं रजतम्' तदा तु शुक्तौ विद्यमानस्य अधिकांशस्य ग्रहणं तत्र क्रियते। अत्र इन्द्रियार्थसन्निकर्षद्वारा ज्ञानस्य बाधो न भवति अपितु ज्ञानजन्य व्यवहारस्य (अल्पांशस्य) बाधो भवति। इति यथार्थख्यातिवादः

**तत्त्वविमर्शः**

'भोक्ता भोग्यं प्रेरितारं च मत्वा'[22] इति श्रुत्युपदिष्टमतः विशिष्टाद्वैतदर्शने विशेषेण त्रयाणां तत्वानां चिन्तनं विहितं वर्त्तते। तानि तत्त्वानि विद्यन्ते-

चित्- जीवः

अचित्- प्रकृतिः/जगत्

चिदचित्- विशिष्ट ईश्वरः (ब्रह्म)

चिदचितोः ब्रह्मणि एवाश्रयः। ब्रह्मणः चिदचिदोश्च सम्बन्धः अङ्गाङ्गीभावरूपेण स्वीक्रियते।

चित्- जीवस्य स्वाभाविकं कर्तृत्वं स्वीक्रियते। विशिष्टाद्वैत-दर्शनप्रक्रियायां जीवः अणुरूपः विद्यते। अत एवोच्यते एषोऽणुरात्मा[23] अस्मिन् दर्शने जीवस्य त्रैविध्यं प्रदर्शितम्।

१. बद्धः- अनादिकर्मपाशैः बद्धः जीवः।
२. मुक्तः- ये कर्मपाशस्य नाशाय प्रकृतिसंबन्धयुताः ईश्वरसायुज्यमेव लभन्ते ते मुक्ताः।
३. नित्यः[24] नित्यानां कदापि कर्मबन्धः प्रकृतिबन्धो वा न भवति।

अचित्तत्त्वम्- प्रकृतिः अचित्तत्त्वं जडरूपमयं सिद्धान्तः। इदं परमात्मनोऽङ्गम् अस्वतन्त्रश्च भवति। अचित् तत्त्वं त्रिगुणात्मकं भवति। सत्त्वरजस्तमोभेदात्।

ईश्वरः (ब्रह्म) - चित्-अचित् विशिष्टम् अद्वैततत्त्वमेव ईश्वरः (ब्रह्म) उच्यते। परमात्मनि चिदचित् तत्त्वमपृथक् विशेषणसम्बन्धेन अर्थात् अङ्गाङ्गीभावेन तिष्ठति। परमात्मा सदैव सविशेषः तस्य सृष्टिरपि सविशेषा इति विशिष्टाद्वैतवादिनः। परमात्मा जगत्कार्यं प्रति उपादानकारणं भूत्वा निमित्तकारणमपि भवति। ईश्वरः सर्वव्यापकः सर्वानुगतः देश-काल-वस्तुपरिच्छेदकाभावेन अनन्तः अस्ति इति विशिष्टाद्वैतवादीनां मतम्।

**बन्धमोक्षविचारः** परमात्मनः अंशस्य विस्मरणमेव बन्धः। प्रकृतसम्बन्धवियोगात् स्वरूपावस्थानमेव

कैवल्यम् अथवा ज्ञानयोगद्वारा चित्मात्रे स्वरूपावगतिः कैवल्यम्। कैवल्यं नास्ति परमार्थमपितु ईश्वरसायुज्यमेव मोक्षः स्वीक्रियते। अयमेव परमः पुरुषार्थः इतीर्यते।

सालोक्य-सामीप्य-सारूप्य-सायुज्येषु ईश्वरसायुज्यमेव मोक्षः इत्युक्तं तत्त्वामुक्ताकलापे। सालोकाद्याः प्रभेदाः सायुज्यस्यैव तावत् तदितरविषये मोक्षशब्दस्तु भाक्तः। विशिष्टाद्वैतदर्शने जीवन्मुक्तिः न स्वीकृता वर्त्तते एतेषां मते तु ईश्वरसायुज्यमेव मोक्ष इति।

**मोक्षोपायविचारः**

विशिष्टाद्वैतदर्शनानुसारं भक्तिः प्रतिपत्तिः च प्रधानरूपेण मोक्षोपायेषु गण्येते। तदुक्तं यतीन्द्रमतदीपिकायाम्-

भक्तिप्रतिपत्तिभ्यां प्रपन्न ईश्वरएव मोक्षं ददाति। अतस्तयोरेव मोक्षोपायत्वम्।[25]

भक्तिः- भागवत्प्रीतिरूपं ज्ञानमेव भक्तिः। निष्कल्मष-निष्कारण-प्रीतिरूपा ज्ञानसन्ततिरेव भक्तिः। यदुक्तं तत्वमुक्ताकलापे-

> भक्तिः मुक्तेरुपायः श्रुतिशतविहितः सा च धीः प्रीतिरूपा॥[26]

**अथ च उक्तम्-**

महनीयविषये प्रीतिः भक्तिः प्रीत्यादयश्च ज्ञानविशेषाः।[27]

प्रपत्तिः- विशिष्टाद्वैतदर्शने प्रपत्तिः स्वतन्त्रेण मोक्षोपायरूपेण निरूप्यते। न्यासः, शरणागतिः, आत्मसमर्पणम्, आत्मनिक्षेपः इत्यादिभिः शब्दैः प्रपत्तिरेव उच्यते। इयं प्रपत्तिः पञ्चाङ्गसमुपेता।

१. अभिगमनम्- जपादिद्वारा भगवदुपसर्पणम्।
२. उपादानम्- पूजाद्रव्यसंग्रहः।
३. इज्या- विष्णुपूजा (वैष्णवदर्शनत्वात्)
४. स्वाध्यायः- वेदाध्ययनम्
५. योगः- अष्टांगयोगस्यानुष्ठानम्।

उक्तं च-

> अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम्।
> तदेकोपायतायां च प्रपत्तिः शरणागतिः॥[28]

**प्रपत्तिः** भक्तिमार्गात् भिद्यते यतः भक्तिः प्रारब्धकर्माणि विहाय अन्यानि कर्माणि विनाशयति किन्तु प्रपत्तिः सर्वैः कर्मभिः सह प्रारब्धकर्मणामपि नाशं करोति इत्यतः आशुमोक्षकारिणी इत्युच्यते॥

**संदर्भ सूची**

1. करणाधिकरणयोश्च ३/३/११७
2. भारतीयदर्शनम् पृ. १९
3. वेदान्तसारः।
4. ब्रह्मसूत्रशांकरभाष्यम्।
5. ब्रह्मसूत्रम् १/२/३०, मीमांसासूत्रम् ३/१/३
6. ब्रह्मसूत्रम् १/२/२८
7. ब्रह्मसूत्रम् १/४/२२, अवस्थितेरिति काशकृत्स्नः।
8. औडुलोमिपक्षे पुनः स्पष्टभेदावस्थान्तरपेक्षौ भेदाभेदौ गम्येते। ब्रह्मसूत्रशांकरभाष्यम् १/४/२२
9. आश्मरथ्यस्य तु यद्यपि जीवस्य परस्मादन्यत्वमभिप्रेतम्। ब्रह्मसूत्रशांकरभाष्यम्।
10. शब्दब्रह्मवादिनस्तु परावाक् एवं ब्रह्म तदेव अविद्यया नानारूपं भासत इति प्राहुः। वा. प. ब्र. का. १३२, भावप्रदीपः
11. महाभाष्यं व्याचक्षाणः भर्तृहरिरपि अद्वैतमेवाभ्युपगच्छति। उमामहेश्वरकृत तत्त्वदीपिका।
12. ज्ञाते द्वैतं न विद्यते। गौडपादकारिका १/१८
13. ब्रह्मावसानोऽयं प्रतिषेधो नाभावावसानः। ब्रह्मसूत्रशांकरभाष्यम् ३/२/२२
14. बृहदारण्यकोपनिषद् १/४/१०
15. ब्रह्मसूत्रशांकरभाष्यम्।
16. वेदान्तपारिजातसौरभम् २/३/१९
17. प्रस्थानरत्नाकरः पृ. ५४
18. पदार्थसंग्रहः पृ. १००
19. निर्वाणषट्कम् १
20. पद्मपुराणम्
21. श्रीभाष्यम् १/१/१
22. श्रीभाष्यम् १/१/१
23. श्वे. उ. १/१२

24. मु. उ. ३/१/९
25. तत्त्वत्रय: पृ. ३५
26. यतीन्द्रमतदीपिका।
27. तत्त्वमुक्ताकलाप:।
28. सर्वार्थसिद्धिव्याख्या।
29. प्रपन्नपारिजातम्।